# shivamIDestavaratnam

# શ્રીશિવમીડેસ્તવરત્નમ્

## Document Information

Text title : shivamIDestavaratnam

File name : shivamIDestava.itx

Category : shiva, stotra, tyAgarAja

Location : doc_shiva

Author : tyAgarAja

Transliterated by : Sridhar Seshagiri

Proofread by : Sridhar Seshagiri

Latest update : June 20, 2002, September 7, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 7, 2022

*sanskritdocuments.org*

# શ્રીશિવમીડેસ્તવરત્નમ્

સ્વપ્રકાશશિવરૂપસદ્ગુરું નિષ્પ્રકાશજડચૈત્યભાસકમ્ ।
અપ્રમેયસુગુણામૃતાલયં સંસ્મરામિ હૃદિ નિત્યમદ્ભુતમ્ ॥ ૧॥

યઃ ક્રીડાર્થં વિશ્વમશેષં નિજશક્ત્યા
    સૃષ્ટ્વા સ્વસ્મિન્ ક્રીડતિ દેવોઽપ્યનવદ્યઃ ।
નિસ્ત્રૈગુણ્યો માયિકભૂમિવ્યતિરિક્તઃ
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨॥

એકો દેવો ભાતિ તરઙ્ગેષ્વિવ ભાનુઃ
    નાનાભૂતેષ્વાત્મસુ સર્વેષ્વપિ નિત્યમ્ ।
શુદ્ધો બુદ્ધો નિર્મલરૂપો નિરવદ્યઃ
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૩॥

દેવાધીશં સર્વવરેણ્યં હૃદયાબ્જે
    નિત્યં ધ્યાત્વા યોગિવરા યં દૃઢભક્ત્યા ।
શુદ્ધા ભૂત્વા યાન્તિ ભવાબ્ધિં ન પુનસ્તે
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૪॥

શ્રૌતૈઃ સ્માર્તૈઃ કર્મશતૈશ્ચાપિ ય ઈશો
    દુર્વિજ્ઞેયઃ કલ્પશતં તૈર્જડરૂપૈઃ ।
સંવિદ્રૂપસ્વૈકવિચારાદધિગમ્યઃ
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૫॥

કર્માધ્યક્ષઃ કામિજનાનાં ફલદાતા
    કર્તૃત્વાહઙ્કારવિમુક્તો નિરપેક્ષઃ ।
દેહાતીતો દૃશ્યવિવિક્તો જગદીશઃ
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૬॥

નાન્તર્બાહ્યે નોભયતો વા પ્રવિભક્તં

યં સર્વજ્ઞં નાપિ સમર્થો નિગમાદિઃ ।
તત્ત્વાતીતં તત્પદલક્ષ્યં ગુરુગમ્યં
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૭॥

યદ્ભાસાર્કો ભાતિ હિમાંશુર્દહનો વા
દૃશ્યૈર્ભાસ્યૈર્યો ન ચ ભાતિ પ્રિયરૂપઃ ।
યસ્માદ્ ભાતિ વ્યષ્ટિસમષ્ટ્યાત્મકમેતત્
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૮॥

આશાદેશાદ્યવ્યવધાનો વિભુરેકઃ
સર્વાધારઃ સર્વનિયન્તા પરમાત્મા ।
પૂર્ણાનન્દઃ સત્ત્વવતાં યો હૃદિ દેવઃ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૯॥

કોઽહં દેવઃ કિં જગદેતત્ પ્રવિચારાદ્
દૃશ્યં સર્વં નશ્વરરૂપં ગુરુવાક્યાત્ ।
સિદ્ધે ચૈવં યઃ ખલુ શેષઃ પ્રતિપન્નઃ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૦॥

સત્યં જ્ઞાનં બ્રહ્મ સુખં યં પ્રણવાન્તં
સર્વસ્ફૂર્તિઃ શાશ્વતરૂપસ્ત્વિતિ વેદાઃ ।
જલ્પન્ત્યેવં સ્વચ્છધિયોઽપિ પ્રભુમેકં
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૧॥

યસ્માદ્ ભીતો વાતિ ચ વાયુસ્ત્રિપુરેષુ
બ્રહ્મેન્દ્રાદ્યાસ્તે નિજકર્મસ્વનુબદ્ધાઃ ।
ચન્દ્રાદિત્યૌ લોકસમૂહે પ્રચરન્તૌ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૨॥

માયાકાર્યં જન્મ ચ નાશઃ પુરજેતુઃ
નાસ્તિ દ્વન્દ્વં નામ ચ રૂપં શ્રુતિવાક્યાત્ ।
નિર્ણીતાર્થો નિત્યવિમુક્તો નિરપાયઃ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૩॥

નાયં દેહો નેન્દ્રિયવર્ગો ન ચ વાયુઃ
નેદં દૃશ્યં જાત્યભિમાનો ન ચ બુદ્ધિઃ ।
ઇત્થં શ્રુત્યા યો ગુરુવાક્યાત્ પ્રતિલબ્ધઃ

તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૪॥

સ્થૂલં સૂક્ષ્મં ક્ષામમનેકં ન ચ દીર્ઘં
હ્રસ્વં શુક્લં કૃષ્ણમખણ્ડોઽવ્યયરૂપઃ ।
પ્રત્યક્સાક્ષી યઃ પરતેજાઃ પ્રણવાન્તઃ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૫॥

યત્સૌખ્યાબ્ધેર્લેશકણાંશોઃ સુરમર્ત્યા-
સ્તિર્યગ્ચોઽપિ સ્થાવરભેદાઃ પ્રભવન્તિ ।
તત્તત્કાર્યપ્રાભવવન્તઃ સુખિનસ્તે
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૬॥

યસ્મિઞ્જ્ઞાતે જ્ઞાતમશેષં ભુવનં સ્યાદ્
યસ્મિન્ દૃષ્ટે ભેદસમૂહો લયમેતિ ।
યસ્મિન્મૃત્યુર્નાસ્તિ ચ શોકો ભવપાશાઃ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૭॥

દ્યાં મૂર્ધાનં યસ્ય વદન્તિ શ્રુતયસ્તાઃ
ચન્દ્રાદિત્યૌ નેત્રયુગં જ્યાં પદયુગ્મમ્ ।
આશાં શ્રોત્રં લોમસમૂહં તરુવલ્લીઃ (તરુવલ્લ્યઃ)
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૮॥

પ્રાણાયામૈઃ પૂતધિયો યં પ્રણવાન્તં
સન્ધાયાત્મન્યવ્યપદેશ્યં નિજબોધમ્ ।
જીવન્મુક્તાઃ સન્તિ દિશાસુ પ્રચરન્તઃ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૧૯॥

યચ્છ્રોતવ્યં શ્રૌતગિરા શ્રીગુરુવાક્યાદ્
યન્મન્તવ્યં સ્વાત્મસુખાર્થં પુરુષાણામ્ ।
યદ્ ધ્યાતવ્યં સત્યમખણ્ડં નિરવદ્યં
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨૦॥

યં જિજ્ઞાસુઃ સદ્ગુરુમૂર્તિં દ્વિજવર્યં
નિત્યાનન્દં તં ફલપાણિઃ સમુપૈતિ ।
ભક્તિશ્રદ્ધાદાન્તિવિશિષ્ટો ધૃતિયુક્તઃ
તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨૧॥

પૃથવ્યમ્બવગ્નિસ્પર્શનખાનિ પ્રવિલાપ્ય
    સ્વસ્મિન્ મત્યા ધારનયા વા પ્રણવેન ।
યચ્છિષ્ટં તદ્ બ્રહ્મ ભવામીત્યનુભૂતં
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨૨॥

લીને ચિત્તે ભાતિ ચ એકો નિખિલેષુ
    પ્રત્યગ્દૃષ્ટ્યા સ્થાવરજન્તુષ્વપિ નિત્યમ્ ।
સત્યાસત્યે સત્યમભૂચ્ચ વ્યતિરેકાત્
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨૩॥

ચેતઃસાક્ષી પ્રત્યગભિન્નો વિભુરેકઃ
    પ્રજ્ઞાનાત્મા વિશ્વભુગાદિવ્યતિરિક્તઃ ।
સત્યજ્ઞાનાનન્દસુધાબ્ધિઃ પરિપૂર્ણઃ
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨૪॥

સર્વે કામા યસ્ય વિલીના હૃદિ સંસ્થાઃ
    તસ્યોદેતિ બ્રહ્મરવિર્યો હૃદિ તત્ર ।
વિદ્યાવિદ્યા નાસ્તિ પરે ચ શ્રુતિવાક્યાત્
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨૫॥

સ ત્યાગેશઃ સર્વગુહાન્તઃ પરિપૂર્ણો
    વક્તા શ્રોતા વેદપુરાણપ્રતિપાદ્યઃ ।
ઇત્થં બુદ્ધૌ જ્ઞાનમખણ્ડં સ્ફુરદાસ્તે
    તં સર્વાઘધ્વંસકમાદ્યં શિવમીડે ॥ ૨૬॥

નિત્યં ભક્ત્યા યઃ પઠતીદં સ્તવરત્નં
    તસ્યાવિદ્યા જન્મ ચ નાશો લયમેતુ ।
કિં ચાત્મનં પશ્યતુ સત્યં નિજબોધં
    સર્વાન્ કામાન્ સ્વં લભતાં સ પ્રિયરૂપમ્ ॥ ૨૭॥

ઇત્યાનન્દનાથપાદપદ્મોપજીવિના કાશ્યપગોત્રોત્પન્નેનાન્ધ્રેણ
ત્યાગરાજનામ્ના વિરચિતં શિવમીડેસ્તવરત્નં સમ્પૂર્ણમ્ ॥

Encoded by Sridhar Seshagiri

*shivamIDestavaratnam*

pdf was typeset on September 7, 2022

Please send corrections to *sanskrit@cheerful.com*